"गोपालेऽकडमं स्मृतमिति" तत्रैवोक्तम्। एतच्च गोपालमन्त्रविषये सिद्धादिचक्रत्वेन व्यवह्रियते ।

**अकथह** न० अ,क,थ,ह, इत्यादिवर्णसंघक्रमेण वर्णसमुदायोऽस्त्यस्मिन् अच् । तन्त्रोक्तमन्त्रग्रहणार्थं तत्तन्मन्त्राणां शुभाशुभविचारोपयोगिनि चक्रभेदे तत्स्वरूपं यथा रुद्रयामले । "वक्ष्येऽकथहचक्राख्यं सर्व्वचक्रोत्तमोत्तमम् । यस्य विचारमात्रेण कामरूपी भवेन्नरः ॥ तत्प्रकारं वीरनाथ ! क्रमशः क्रमशः शृणु । चतुरस्रे लिखेत् वर्णान् चतुःकोष्ठसमन्विते ॥ चतुःकोष्ठ-चतुष्कोष्ठचतुर्गृहसमन्वितम् । मन्दिरं षोडशं प्रोक्तं सर्व्वकर्म्मार्थसिद्धिदम् ॥ चतुरस्रं लिखेत् कोष्ठं चतुष्कोष्ठसमन्वितम् । पुनश्चतुष्कं तत्रापि लिखेद्धीमान् क्रमेण तु ॥ सर्व्वेषु गृहमध्येषु प्रादक्षिण्य क्रमेण तु । अकारादिक्षकारान्तान् लिखित्वा गणयेत्ततः ॥ चन्द्रमग्निं रुद्रवर्णं नवमं युगलन्तथा ॥ वेदमङ्कं दश रसं वसुं षोड़शमेव च । चतुर्दशं भास्करं च सप्त पञ्चदशेति च ॥ वह्नीन्दु कोष्ठगं वर्णपञ्चाशकं मयोदितम् । एतदङ्कस्थितान् वर्णान् गणयेत् तदनन्तरम् ॥ नामाद्यक्षरमारभ्य यावत् मन्त्रादिमाक्षरम् । चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयम् ॥ पुनः कोष्ठगकोष्ठेषु सव्यतो नामकादितः । सिद्धः साध्यः सुसिद्धोऽरिः क्रमशो गणयेत् वशी ॥ सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः । सुसिद्धो ग्रहणाज्ज्ञानी शत्रुर्हन्ति चिरायुषम् । सिद्धस्तु बान्धवः प्रोक्तः साध्यः सेवक उच्यते । सुसिद्धः पोषकः प्रोक्तः शत्रुर्घातक उच्यते । सिद्धकोष्ठस्थिता वर्णा बान्धवाः सर्वकामदाः । जपेन बन्धुः सिद्धः स्यात् सेवकोऽधिकसेवनात् ॥ पुष्णाति पोषकोऽभीष्टं घातको नाशयेत् ध्रुवम् । सिद्धो यथोक्तकालेन द्विगुणात् सिद्धसाध्यकः ॥ तत्सुसिद्धोऽर्द्धजप्येन सिद्धारिर्हन्ति बान्धवान् । साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः ॥ तत्सुसिद्धो द्विघ्नजपात् साध्यारिर्हन्ति गोत्रजान् । सुसिद्धसिद्धोऽर्द्धजपात् तत्साध्यो द्विगुणाधिकात् । तत्सुसिद्धो ग्रहादेव सुसिद्धारिः सगोत्रहा ॥ अरिसिद्धः सुतान् हन्यात् अरिसाध्यस्तु कन्यकाः । तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हन्ति साधकमिति" ॥ एतच्च सर्व्वमन्त्रेषु सिद्धादिचक्रत्वेन व्यवह्रियते ।

**अकनिष्ठ** पु० अके वेदनिन्दारूपे पापे निष्ठाऽस्य । बुद्धे । न० त० । कनिष्ठभिन्ने ज्येष्ठे मध्यमादौ च त्रि० ।

**अकनिष्ठप** पु० अकनिष्ठान् बुद्धान् पातीति पा-क । बुद्धाधिपभेदे । न० त० । कनिष्ठभिन्नपालके त्रि० ।

**अकम्पित** पु० कम्पितं बुद्धिवृत्तेश्चालनं तन्नास्ति यस्य । बुद्धभेदे । कपि-कर्त्तरि क्त न० त० । सङ्कल्पितवस्तुभ्योऽनुपरते दृढ़ाध्यवसाये त्रि० । भावे क्त न० व० । कम्पनशून्ये त्रि० ।

**अकरण** न० कृ-भावे ल्युट् अर्थाभावे न० त० । करणाभावे निवृत्तौ "अकरणे प्रत्यवायानुबन्धित्वं नित्यत्वमिति" मीमांसकादयः । "अकरणात् मन्दकरणं श्रेय" इति स्मार्त्ताः अकरणञ्च न्यायादिमते करणाभावः, मीमांसकवेदान्तिमते निवृत्तिः । अत एव अष्टम्यां मांसं नाश्नीयादित्यादौ सर्वत्र निषेधसमभिव्याहृतक्रियाविषयकनिवृत्तावेव विध्यर्थान्वयः इत्युक्तं मीमांसकैः । शङ्कराचार्य्येण च "नासतो विद्यते भावोनाभावो विद्यते सत" इति गीताश्लोकभाष्ये महता प्रबन्धेन सत्पदार्थादभावोत्पत्तिं निरस्यता निषेधस्य निवृत्तिरूपत्वमुररीकृतम् । निवृत्तिश्च प्रवृत्तिविरोधी भावरूपोधर्मविशेषः । नास्ति करणं देहेन्द्रियादिकमस्य । सर्व्वकरणशून्ये परात्मनि पु० । "अपाणिपादोजवनोग्रहीतेत्यादि" श्रुतौ तस्य सर्वकरणशून्यत्वमुक्तम् ।

**अकरणि** स्त्री० नञ्+कृ-आक्रोशे अनि । करणं मा भूदित्याक्रोशात्मके शापे । "तस्याकरणिरेवास्तु" इति ।

**अकरा** स्त्री० अकं दुःखं सेवनात् लोकानां राति गृह्णाति नाशयतीति रा-क । आमलक्याम् । नास्ति करोऽस्य । करशून्ये त्रि० । न करोति कृ-अच् न० त० । कारकभिन्ने करणशीलभिन्ने निवृत्तिपरे च त्रि० ।

**अकरुण** त्रि० नास्ति करुणा यस्य यत्र वा । दयाशून्ये दैन्यशून्ये च ।

**अकर्कश** त्रि० न कर्कशः । कार्कश्यविरोधिमृदुत्ववति कोमले

**अकर्ण** त्रि० नास्ति कर्णोऽस्य । श्रवणेन्द्रियशून्ये "पश्यत्यकर्ण" इति श्रुतिः । सर्पे पु० तस्य चक्षुषैव श्रवणात्तदिन्द्रियशून्यत्वम् । राधेयः कर्णः तच्छून्ये त्रि० । "अनर्जुनमकर्णं वा जगदद्येति निश्चितमिति" भारतम् ।

**अकर्त्तन** त्रि० उच्चस्य फलं कर्त्तितुं शीलमस्य कृत-युच् न० त० । उच्चविरोधिह्रस्वत्ववति खर्वे । कृत-भावे ल्युट् न० ब० । छेदनाकर्त्तरि त्रि० ।

**अकर्त्तव्य** त्रि० कृ-कर्म्मादौ तव्य न० त० । करणानर्हे निषिद्धे पदार्थे । भावे क्त न० ब० । क्रियाशून्ये कूटस्थे चैतन्ये न० । "न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चनेति" गीतायामीश्वरस्य सर्वक्रियानिषेधात् तथात्वम् ।

**अकर्त्तृ** त्रि० कर्त्तृ+न० त० । कर्त्तृभिन्ने कर्त्तृसदृशे कारके